चातुर्वर्ण्यवधे साक्ष्येऽनृतभाषणेऽनुपातकलाभा-
वाञ्छु प्रायश्चित्तमाह याज्ञवल्क्यः ।
“वर्णिनां हि वधो यत्र तत्र साक्ष्येऽनृतं वदेत् ।
तत्पावनाय निर्व्वाप्यश्चरुः सारस्वतो द्विजैः ॥”
शूद्रे तु विप्रः । तत्पावनाय कुष्माण्डीभिर्द्विजो-
ऽग्निं जुहुयात् । शूद्रस्यैकोद्दिष्टं गोदशकस्य
ग्रासं विदध्यात् । विषयविशेषेऽपवादमाह
हारीतः । सोमविक्रयकन्याविवाहभयमैथुन-
बालकसंज्ञपनं गोब्राह्मणहितञ्च कुर्व्वन् मिथ्या
न लिप्यत इति । तथा च यमः ।

“न नर्म्मयुक्तं वचनं हिनस्ति
न स्त्रैरवाक्यं न च मैथुनार्थे ।
प्राणात्यये सर्व्वधनापहारे
पञ्चानृतान्याहुरपातकानि ॥”

इति प्रायश्चित्तविवेकः ॥

मिथ्याचारः, त्रि, ( मिथ्या आचारोऽस्य । )
कपटाचारः । दाम्भिक इत्यर्थः । इति वक्ष्य-
माणश्लोकटीकायां श्रीधरस्वामी ॥ यथा,—
“कर्म्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् ।
इन्द्रियार्थान् विमूढात्मा मिथ्याचारः स
उच्यते ॥”

इति श्रीभगवद्गीतायां ३ अध्यायः ॥

मिथ्यादृष्टिः, स्त्री, ( मिथ्या च सा दृष्टिश्चेति । )
कर्म्मफलापवादकज्ञानम् । तत्पर्य्यायः । नास्ति-
कता २ । इत्यमरभरतौ । १ । ५ । ४ ॥ असत्य-
दर्शनञ्च ॥

मिथ्याध्यवसितिः, स्त्री, ( मिथ्या असत्या च सा
अध्यवसितिश्चेति । ) मिथ्याध्यवसायः । असत्यो-
त्साहः । इति केचित् ॥

मिथ्यानिरसनं, क्ली, ( मिथ्या असत्यं निरस्यते
अनेन । निर् + अस् + करणे ल्युट् ।) शपथः ।
इत्यमरटीकायां भरतः ॥

मिथ्याभियोगः, पुं, ( मिथ्या असत्यमभियोगः । )
मिथ्यावादः । शतं मे धारयसीत्यादि मिथ्यो-
द्भावनम् । तत्पर्य्यायः । अभ्याख्यानम् २ ।
इत्यमरभरतौ ॥

मिथ्याभिशंसनं क्ली, (मिथ्या असत्यस्य अभिशंसनं
कथनम् ।) स्वर्णस्तेयं त्वया कृतमित्यादि मिथ्या-
दूषणं वाक्यम् । तत्पर्य्यायः । अभिशापः २ ।
इत्यमरभरतौ ॥

मिथ्याभिशापः, पुं, ( मिथ्या अभिशापः । )
मिथ्यापवादः । यथा, भोजराजः ।
“शुक्लपक्षे चतुर्थ्यान्तु सिंहे चन्द्रस्य दर्शनम् ।
मिथ्याभिशापं कुरुते न पश्येत्तत्र तं ततः ॥”

इति तिथ्यादितत्त्वम् ॥

मिथ्यामतिः, स्त्री, ( मिथ्या चासौ मतिश्चेति । )
भ्रान्तिः । इत्यमरः । १ । ५ । ४ ॥ असत्य-
बुद्धिश्च ॥

मिथ्यासाक्षी, [न्] त्रि, ( मिथ्याभाषी साक्षी-
साक्षाद् द्रष्टा चेति ।) कूटसाक्षी । तस्य ज्ञान-
प्रकारमाह याज्ञवल्क्यः ।
“उक्तेऽपि साक्षिभिः साक्ष्ये यद्यन्ये गुणवत्तमाः ।
द्विगुणा वान्यथा ब्रूयुः कूटाः स्युः पूर्व्व-
साक्षिणः ॥”
मिथ्यासाक्ष्यकथने दोषमाह याज्ञवल्क्यः ।
“ये पातककृतां लोका महापातकिनां तथा ।
अग्निदानाञ्च ये लोका ये च स्त्रीबालघाति-
नाम् ॥
एतान् सर्व्वानवाप्नोति यः साक्ष्यमनृतं वदेत् ।
सुकृतं यत्त्वया किञ्चित् जन्मान्तरशतैः कृतम् ।
तत् सर्व्वं तस्य जानीहि यं पराजयसे मृषा ॥”

इति मिताक्षरा ॥

मिथ्योत्तरं, क्ली, ( मिथ्या असत्यमुत्तरं । ) चतुर्थो-
त्तरान्तर्गतोत्तरविशेषः । तस्य लक्षणम् ।
“अभियुक्तोऽभियोगस्य यदि कुर्य्यादपह्नवम् ।
मिथ्या तत्तु विजानीयादुत्तरं व्यवहारतः ॥”

इति नारदः ॥

तच्चतुर्व्विधम् । मिथ्यैतत् १ अहं नाभिजानामि
२ मम तत्र न सन्निधिः ३ तत्कालेऽहमजातः
४ । यथा, व्यासनारदौ ।
“मिथ्यैतन्नाभिजानामि मम तत्र न सन्निधिः ।
अजातश्चास्मि तत्काले इति मिथ्या चतु-
र्विधम् ॥”

इति व्यवहारतत्त्वम् ॥

मिद इ क स्निहि । इति कविकल्पद्रुमः ॥ (चुरा०-
पर०-अक०-सेट् । ) इ क मिन्दयति वर्त्तिका
तैलेन । इति दुर्गादासः ॥

मिद इर् य ञा स्निहि । इति कविकल्पद्रुमः ॥
( दिवा०-पर०-अक०-सेट् । ) इर् अमिदत्
अमेदीत् । य इति वायामश्रीलोऽसौ महा-
कायो न मेद्यतीति हलायुधः । ञा मेदितं
मिन्नं तेन । इति दुर्गादासः ॥

मिद ऋ ञ वधमेधयोः । इति कविकल्पद्रुमः ॥
( भ्वा०-उभ०-सक०-सेट् । ) ऋ अमिमेदत् ।
ञ मेदति मेदते शास्त्रार्थं श्रिष्यो धारयती-
त्यर्थः । मिमिदुः मिमेदुः । इति दुर्गा-
दासः ॥

मिद, ऌ ञा ञि ङ स्निहि । इति कविकल्पद्रुमः ॥
( भ्वा०-आत्म०-सक०-सेट् । ) ऌ अमिदत् ।
ञि मिन्नोऽस्ति । ङ मेदते । इति दुर्गादासः ॥

मिद, क स्निहि । इति कविकल्पद्रुमः ॥ (चुरा०-
पर०-अक०-सेट् ।) क मेदयति वर्त्तिका तैलेन ।
इति दुर्गादासः ॥

मिन्मिनः, त्रि, सानुनासिकवाग्विशिष्टः । खोना
इति भाषा । तस्य निदानं यथा,—
“आवृत्य वायुः सकफो धमनीः शब्दवाहिनीः ।
नरान् करोत्यक्रियकान् मूकमिन्मिनगद्गदान् ॥”

इति माधवकरः ॥

अक्रियकान् इत्यत्रावचनानिति च पाठः ।
अवचनान् अत्रेषदर्थे नञ् । तेन ईषद्वचनान् ।
स एव वायुः प्रबलश्चेत्तदा मूकान् अवचनान् ।
मिन्मिनान् सानुनासिकान् । गद्गदान् लुप्तपद-
वाक्यनाभिधायिनः करोतीत्यन्वयः । एषां
समानकारणत्वेऽपि दुष्टेरल्पत्वादिना अदृष्ट-
वशाद्वा भेदो बोद्धव्यः ॥ * ॥ अथ तेषां चिकित्सा ।
“पक्वं घृतस्य पलिकैः शिग्रुवचालवणधातकी-
लोध्रैः ।
ब्राह्मे पयसि विपक्वं सिद्धं सारस्वतं नाम्ना ॥
विधिवदुपयुज्यमानं जड़गद्गदमूकतां चिरात्
जित्वा ।
स्मृतिमतिमेधाप्रतिभाः कुर्य्यात् संसद्वाग्-
भवति ॥

सारस्वतं घृतम् ।
“सहरिद्रा वचा कुष्ठं पिप्पली विश्वभेषजम् ।
अजाजी चाजमोदा च यष्टीमधुकसैन्धवम् ॥
एतानि समभागानि सूक्ष्मचूर्णानि कारयेत् ।
तच्चूर्णं सर्पिषालोड्य प्रत्यहं भक्षयेन्नरः ॥
एकविंशतिरात्रेण भवेच्छ्रुतिधरो नरः ।
मेघदुन्दुभिनिर्घोषो मत्तकोकिलनिस्वनः ॥”
इति भावप्रकाशस्य द्वितीये भागे मध्यखण्डे
वातव्याध्यधिकारे ॥

मिल, श ञ श्लिषि । इति कविकल्पद्रुमः ॥ (तुदा०-
उभ०-अक०-सेट् ।) श्लिषि सम्बन्धीभावे । श ञ
मिलति मिलते लता वृक्षेण । अयं कुटादि-
रिति कुलचन्द्रः । तेन आलनिलयमिलनेन
गरलमिव कलयति मलयसमीरम् । इति जय-
देवः । मिलिष्यन्ति ।
“महापातकिनः पञ्च मिलितव्यं न तैः सह ।”

इति दुर्गादासः ॥

मिलितः, त्रि, मिलधातोः कर्त्तरि क्तप्रत्ययेन
निष्पन्नः । श्लिष्टः । सम्बन्धविशिष्टः । युक्तः ।
(यथा, देवीभागवते । १ । ११ । ८० ।
“पुनर्व्विवादः सञ्जातो मिलिता देवदानवाः ।
युद्धार्थमागतास्तेषां समाजः समजायत ॥”)

मिव, इ सेके । इति कविकल्पद्रुमः ॥ ( भ्वा०-
पर०-सक०-सेट् । ) इ मिन्वति । इति दुर्गा-
दासः ॥

मिश, ध्वनौ । कोपे । इति कविकल्पद्रुमः ॥ (भ्वा०-
पर०-अक०-सेट् ।) मेशति । इति दुर्गादासः ॥

मिशिः, स्त्री, ( मिश + इन् । ) मधुरिका । शत-
पुष्पा । इत्यमरटीकायां भरतः ॥ जटामांसी ।
इति शब्दरत्नावली ॥

मिशी, स्त्री, ( मिशि + कृदिकारादिति पक्षे
ङीष् । ) जटामांसी । इति शब्दरत्नावली ॥
मधुरिका । इत्यमरटीकायां भरतः ॥

मिश्र, त क युक्ताम् । इति कविकल्पद्रुमः ॥
(चुरा०-पर०-सक०-सेट् ।) तालव्यमध्योऽयम् ।
दन्त्यमध्य इति वर्द्धमानायाम् । युतिः संयो-
जनम् । मिश्रयति मिश्रापयति घृतेनान्नं
लोकः । इति दुर्गादासः ॥

मिश्रं, क्ली, (मिश्र + बाहुलकात् रक् ।) चाणक्य-
मूलकम् । इति राजनिर्घण्टः ॥ मिश्रितम् ।
यथा,—
“केचिदाहुः क्वचिद्देशे यावत्तु दिननाड़िकाः ।
तावदेव लवध्यायो न तन्मिश्रं दिनान्तरे ॥”

इति तिथ्यादितत्त्वम् ॥